1606

क्र.नं.८

संस्कृत

अ८।०व्या।८

# राजवाडे

अंक ८८६

शाखा व्याकरण

ग्रंथनाम अष्टाध्यायी - पाणिनीय प्रथमाध्याय सूत्रपाठ

ग्रंथकार

काल

स्थल

इ. वि. का. राजवाडे संशोधन मंदिर
क्रमांक..........
धुळे
हस्तलिखित ग्रंथ संग्रह.

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "
8

(1)

॥अथ रुद्रपाठप्रारंभः॥

इ. वि. का. राजवाडे संशोधन मंदिर
क्रमांक 8
हस्तलिखित ग्रंथ संग्रह
" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

सु·पा· ॥श्रीगणेशाय नमः॥ ॐ मू॥ येनाक्षरसमाम्नायमधिगंम्यमहेश्वरात्‌॥ कृत्स्नं व्याकरणं प्रो
क्तं तस्मै पाणिनये नमः॥ येन धौता गिरः पुंसां विमलैः शब्दवारिभिः॥ तमश्चाज्ञानजं भि
१ न्नं तस्मै पाणिनये नमः॥ अइउण्‌। ऋऌक्‌। एओङ्‌। ऐऔच्‌। हयवरट्‌। लण्‌। ञमङणनम्‌
म्‌। झभञ्‌। घढधष्‌। जबगडदश्‌। खफछठथचटतव्‌। कपय्‌। शषसर्‌। हल्‌॥ इति म
त्याहारसूत्राणि॥ वृद्धिरादैच्‌। अदेङ्गुणः। इको गुणवृद्धी। न धातुलोप आर्धधातुके। क्ङिति
दि च। दीधीवेवीटां। हलोनंतराः संयोगः। मुखनासिकावचनोनुनासिकः। तुल्यास्यप्रयत्नं
सवर्णं। नाज्झलौ। ईदूदेद्द्विवचनं प्रगृह्यं। अदसो मात्‌। शे। निपातएकाजनाङ्‌। ओत्‌। राम्॥
संबुद्धौ शाकल्यस्येतावनार्षे। उञः। ऊँ। ईदूतौ च सप्तम्यर्थे। दाधाघ्वदाप्‌। १२। आद्यंत २
वदेकस्मिन्‌। तरप्तमपौ घः। बहुगणवतुडति संख्या। ष्णांता षट्‌। डति च। क्तक्तव

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

तू निष्ठा। सर्वादीनिसर्वनामानि। विभाषादिक्समासेबहुव्रीहौ। नबहुव्रीहौ। तृतीयास
मासे। द्वंद्वेच। विभाषाजसि। प्रथमचरमतयाल्पार्धकतिपयनेमाश्च। पूर्वपरावरदक्षि
णोत्तरापराधराणिव्यवस्थायामसंज्ञायां। स्वमज्ञातिधनाख्यायां। अंतरंबहिर्योगोपसंव्या
नयोः। स्वरादिनिपातमव्ययं। तद्धितश्चासर्वविभक्तिः। कृन्मेजंतः। क्त्वातोसुनकसुनः।
२। अव्ययीभावश्च। शिसर्वनामस्थानं। सुडनपुंसकस्य। नवेतिविभाषा। इग्यणःसं
प्रसारणं। आद्यंतौटकितौ। मिदचोंत्यात्परः। एचइग्घ्रस्वादेशे। षष्ठीस्थानेयोगा।
स्थानेंतरतमः। उरण्परः। अलोंत्यस्य। ङिच्च। आदेःपरस्य। अनेकाल्शित्स
र्वस्य। स्थानिवदादेशोनल्विधौ। अचःपरस्मिन्पूर्वविधौ। नपदांतद्विर्वचनव
रेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु। द्विर्वचनेचि। अदर्शनंलोपः।
२॥

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai"

॥२॥ प्रत्ययस्य लुक्श्लुलुपः। प्रत्ययलोपे प्रत्ययलक्षणं। द्विर्वचनेऽचि। न लुमतांगस्य। अचोंत्यादि टि। अ
अलोंत्यात्पूर्व उपधा। तस्मिन्निति निर्दिष्टे पूर्वस्य। तस्मादित्युत्तरस्य। स्वं रूपं शब्दस्याशब्द
संज्ञा। अणुदित्सवर्णस्य चाप्रत्ययः। तपरस्तत्कालस्य। आदिरंत्येन सहेता। येन विधिस्त
दंतस्य। वृद्धिर्यस्याचामादिस्तद्वृद्धं। त्यदादीनि च। एङ् प्राचां देशे। ॥१॥ वृद्धिराद्यंतवर
व्ययीभावः प्रत्ययस्य लुक् पंच दश॥ गाङ्कुटादिभ्योञ्णिन्ङित्। विज इट्। विभाषोर्णोः।
सार्वधातुकमपित्। असंयोगाल्लिट् कित्। इंधिभवतिभ्यां च। मृडमृदगुधकुषक्लिश
॥३ वदवसः क्त्वा। रुदविदमुषग्रहिस्वपिप्रछः संश्च। इको झल्। हलंताच्च। लिङ्सिचावा
त्मनेपदेषु। उश्च। वा गमः। हनः सिच्। यमो गंधने। विभाषोपयमने। स्थाघ्वोरिच्च। ॥राम॥
न क्त्वा सेट्। निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः। मृषस्तितिक्षायां। ॥ उदुपधाद्भा ॥२॥

वादिकर्मणोरन्यतरस्यां।पूङः क्त्वा च।नोपधाथफांताद्वा।वंचिलुंचृतस्य।तृषिमृषिकृ
षेः काश्यपस्य।रलोव्युपधाद्धलादेः संश्च।ऊकालोऽज्झस्वदीर्घप्लुतः।अचश्च।उच्चैरुदात्तः।
नीचैरनुदात्तः।समाहारः स्वरितः।तस्यादित उदात्तमर्द्धह्रस्वं।एकश्रुति दूरात्संबुद्धौ।यज्ञकर्म
ण्यजपन्यूंखसामसु।उच्चैस्तरां वा वषट्कारः।विभाषा छंदसि।न सुब्रह्मण्यायां स्वरितस्य
॥३॥४ तूदात्तः।देवब्रह्मणोरनुदात्तः।स्वरितात्संहितायामनुदात्तानां।उदात्तस्वरितपरस्य संन
तरः।अपृक्त एकाल्प्रत्ययः।तत्पुरुषः समानाधिकरणः कर्मधारयः।प्रथमानिर्दिष्टं समा
स उपसर्जनं।एकविभक्ति चापूर्वनिपाते।अर्थवदधातुरप्रत्ययः प्रातिपदिकं।कृत्तद्धि
तसमासाश्च।ह्रस्वो नपुंसके प्रातिपदिकस्य।गोस्त्रियोरुपसर्जनस्य।लुक् तद्धितलु

।।२।। कि।इद्गोण्याः।लुपि युक्तवद्व्यक्तिवचने।विशेषणानां चाजातेः।तदशिष्यं संज्ञाप्रमाणत्वात्।
लुब्योगाप्रख्यानात्।योगप्रमाणे च तदभावे दर्शनं स्यात्।प्रधानप्रत्ययार्थवचनमर्थस्यान्य
प्रमाणत्वात्।कालोपसर्जने च तुल्यं।जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यां।।
अस्मदो द्वयोश्च।फल्गुनीप्रोष्ठपदानां च नक्षत्रे।।३।।छंदसि पुनर्वस्वोरेकवचनं।।
विशाखयोश्च।तिष्यपुनर्वस्वोर्नक्षत्रद्वंद्वे बहुवचनस्य द्विवचनं नित्यं।सरूपाणा
मेकशेष एकविभक्तौ।वृद्धो यूना तल्लक्षणश्चेदेव विशेषः।स्त्री पुंवच्च।पुमान् स्त्रि
या।भ्रातृपुत्रौ स्वसृदुहितृभ्यां।नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यां।पिता रामः।।
मात्रा।श्वशुरः श्वश्र्वा।त्यदादीनि सर्वैर्नित्यं।ग्राम्यपशुसंघेष्वतरुणेषु स्त्री।।४।। ।।२।।

4A

गाङ्‌कुटादिघुपधाद ष्टक्तश्छं ह्रस्सि पुनर्वस्वोरवयोरद्रश्च।। भूवादयो धातवः उपदेशेऽजनुना
सिकइत्। हलंत्यं। न विभक्तौ तुस्माः। आदिर्ञिटुडवः। षः प्रत्ययस्य। चुटू। लशक्वतद्धिते।
तस्य लोपः। यथासंख्यमनुदेशः समानां। स्वरितेनाधिकारः। अनुदात्तङित आत्मेपदं। भा
वकर्मणोः। कर्तरि कर्मव्यतिहारे। न गतिहिंसार्थेभ्यः। इतरेतरान्योन्योपपदाच्च। नेर्विशः।
परिव्यवेभ्यः क्रियः। विपराभ्यां जेः। आङो दोनास्यविहरणे।।१।। क्रीडोनुसंपरिभ्यश्च। सम ऊ
वप्रविभ्यस्थः। प्रकाशनस्थेयाख्ययोश्च। उदोनूर्ध्वकर्मणि। उपान्मंत्रकरणे। अकर्मका
च्च। उद्विभ्यां तपः। आङो यमहनः। समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्यः। निस
मुपविभ्यो ह्वः। स्पर्धायामाङः। गंधनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोप

॥१॥ योगेषु कृञः। अधेः प्रसहने। वेः शब्दकर्मणः। अकर्मकाच्च। संमाननोत्संजनाचार्यकर
णज्ञानभृतिविगणनव्ययेषु नियः। कर्तृस्थे चाशरीरे कर्मणि। वृत्तिसर्गतायनेषु क्रमः।
उपपराभ्यां। आङ उद्गमने।॥२॥ वेः पादविहरणे। प्रोपाभ्यां समर्थाभ्यां। अनुपसर्गाद्वा।
अपह्नवे ज्ञः। अकर्मकाच्च। संप्रतिभ्यामनाध्याने। भासनोपसंभाषाज्ञानयत्नविमत्यु
पमंत्रेषु वदः। व्यक्तवाचां समुच्चारणे। अनोरकर्मकात्। विभाषा विप्रलापे। अवाद्ग्रः।
समः प्रतिज्ञाने। उदश्चरः सकर्मकात्। समस्तृतीयायुक्तात्। दाणश्च सा चेच्चतु
र्थ्यर्थे। उपाद्यमः स्वकरणे। ज्ञाश्रुस्मृदृशां सनः। नानोर्ज्ञः। प्रत्याङ्भ्यां श्रुवः। शदेः शि रामू
शितः।॥३॥ म्रियतेर्लुङ्लिङोश्च। पूर्ववत्सनः। आम्प्रत्ययवत्कृञोनुप्रयोगस्य। प्रो ॥४॥

पाभ्यां युजेरयज्ञपात्रेषु । समः क्ष्णुवः । भुजोनवने । णेरणौयत्कर्म णौ चेत्स कर्तानाध्याने । भी
स्म्योर्हेतुभये । गृधिवंच्योः प्रलंभने । लियः संमाननशालीनीकरणयोश्च । मिथ्योपपदात्कृञो
भ्यासे । स्वरितञितः कर्त्रभिप्राये क्रियाफले । अपाद्वदः । णिचश्च । समुदाङ्भ्यो यमोग्रंथे ।
अनुपसर्गाज्ज्ञः । विभाषोपपदेन प्रतीयमाने । शेषात्कर्तरि परस्मैपदं । अनुपराभ्यां कृञः ।
अभिप्रत्यतिभ्यः क्षिपः । ॥ प्राद्वहः । परेर्मृषः । व्याङ्परिभ्यो रमः । उपाच्च । विभाषाकर्म
कात् । बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः । निगरणचलनार्थेभ्यश्च । अणावकर्मकाच्चि
त्तवत्कर्तृकात् । न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः । वा क्यषः । द्युद्भ्यो लुङि ।
वृद्भ्यः स्यसनोः । लुटि च कॢपः । ३ । भूवादयः क्रीडोनुवेः पादं म्रियतेः प्राद्वहः स्वयोदश ॥
भाकडारादेका संज्ञा । विप्रतिषेधे परं कार्यं । यू स्त्र्याख्यौ नदी । नेयङुवङ्स्था:

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

॥५॥ नावस्त्री। वामि। ङिति ह्रस्वश्च। शेषो घ्यसखि। पतिः समास एव। षष्ठीयुक्तः श्छंदसि वा। ह्र
स्वं लघु। संयोगे गुरु। दीर्घं च। यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेंगं। सुप्तिङंतं पदं। नःक्ये।
सिति च। स्वादिष्वसर्वनामस्थाने। यचि भं। तसौ मत्वर्थे। अयस्मयादीनि छंदसि। ४१
बहुषु बहुवचनं। द्व्येकयोर्द्विवचनैकवचने। कारके। ध्रुवमपायेपादानं। भीत्रार्थानां भ
यहेतुः। पराजेरसोढः। वारणार्थानामीप्सितः। अंतर्धौ येनादर्शनमिछति। आख्यातोप
योगे। जनिकर्तुः प्रकृतिः। भुवः प्रभवः। कर्मणा यमभिप्रैति स संप्रदानं। रुच्यर्थानां प्री
यमाणः। श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः। धारेरुत्तमर्णः। स्पृहेरीप्सितः। क्रुधद्रुहे राम
र्ष्यासूयार्थानां यं प्रति कोपः। क्रुधद्रुहोरुपसृष्टयोः कर्म। राधीक्ष्योर्यस्य विप्रश्नः। प्रत्या ॥५॥
ङ्भ्यां श्रुवः पूर्वस्य कर्ता। २। अनुप्रतिगृणश्च। साधकतमं करणं। दिवः कर्म च।

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

6A

परिक्रयणे संप्रदानमन्यतरस्यां ।आधारोधिकरणं ।अधिशीङ्स्थासां कर्म ।अभिनिविशश्च ।
उपान्वध्याङ्वसः ।कर्तुरीप्सिततमं कर्म ।तथायुक्तं चानीप्सितं ।अकथितं च ।गतिबुद्धिप्रत्य
वसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ ।हृक्रोरन्यतरस्यां ।स्वतंत्रः कर्ता ।तत्प्रयो
जको हेतुश्च ।प्राग्रीश्वरान्निपाताः ।चादयोसत्वे ।प्रादयः ।उपसर्गाः क्रियायोगे ।गतिश्च ।३।।
ऊर्यादिच्विडाचश्च ।अनुकरणं चानितिपरं ।आदरानादरयोः सदसती ।भूषणेलं ।अंतर
परिग्रहे ।कणेमनसी श्रद्धाप्रतिघाते ।पुरोव्ययं ।अस्तं च ।अच्छगत्यर्थवदेषु ।अदोनुप
देशे ।तिरोंतर्द्धौ ।विभाषाकृञि ।उपाजेन्वाजे ।साक्षात्प्रभृतीनि च ।अनत्याधान उरसि
मनसी ।मध्ये पदे निवचने च ।नित्यं हस्ते पाणावुपयमने ।प्राध्वं बंधने ।जीविकोपनिष
द्वावौपम्ये ।ते प्राग्धातोः ।४।।छंदसि परेपि ।व्यवहिताश्च ।कर्मप्रवचनीयाः ।अनुर्लक्षणे

॥६॥ क्षणे।तृतीयार्थे।हीने।उपोधिके च।अपपरी वर्जने।आङ्मर्यादावचने।लक्षणेनाभिप्रती आभिमुख्ये।अनुर्यत्समया।यस्य चायामः।तिष्ठद्गुप्रभृतीनि च।पारे मध्ये षष्ठ्या वा।संख्या वंश्येन।नदीभिश्च।अन्यपदार्थे च संज्ञायाम्।तत्पुरुषः।द्विगुश्च।द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः।स्वयं क्तेन।खट्वा क्षेपे।सामि।कालाः।अत्यन्तसंयोगे च।तृतीया तत्कृतार्थेन गुणवचनेन।पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः।कर्तृकरणे कृता बहुलम्।कृत्यैरधिकार्थवचने।अन्नेन व्यञ्जनम्।भक्ष्येण मिश्रीकरणम्।चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः।पञ्चमी भयेन।अपेतापोढमुक्तपतितापत्रस्तैरल्पशः।स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन।सप्तमी शौण्डैः।सिद्धशुष्कपक्वबन्धैश्च।ध्वाङ्क्षेण क्षेपे।कृत्यैरृणे।संज्ञायाम्।क्तेनाहोरात्रावयवाः।तत्र।क्षेपे।पात्रेसमितादयश्च।पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन।दिक्संख्ये संज्ञायाम्।तद्धितार्थोत्तरपदसमाहारे च।संख्यापूर्वो द्विगुः।कुत्सितानि कुत्सनैः।पापाणके कुत्सितैः।उपमानानि सामान्यवचनैः।उपमितं व्याघ्रादिभिः सामान्याप्रयोगे।विशेषणं विशेष्येण बहुलम्।पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च।श्रेण्यादयः कृतादिभिः।क्तेन नञ्विशिष्टेनानञ्।सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः।वृन्दारकनागकुञ्जरैः पूज्यमानम्।कतरकतमौ जातिपरिप्रश्ने।किं क्षेपे।पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः।प्रशंसावचनैश्च।युवा खलतिपलितवलिनजरतीभिः।कृत्यतुल्याख्या अजात्या।वर्णो वर्णेन।कुमारः श्रमणादिभिः।चतुष्पादो गर्भिण्या।मयूरव्यंसकादयश्च।

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com